শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীকৃষ্ণ প্রণীতং

# ॥ শ্রী লক্ষ্মীনারাযণাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী লক্ষ্মীনারাযণাষ্টকম্ ॥

## ধ্যানম্

চক্রং ৱিদ্যাৱরঘটগদাদর্পণং পদ্মযুগ্মং
দোর্ভির্বিভ্রৎসুরুচিরতনুং মেঘৱিদ্যুন্নিভাভম্।
গাঢোৎকণ্ঠং ৱিৱশমনিশং পুণ্ডরীকাক্ষলক্ষ্ম্যোঃ
একীভূতং ৱপুরৱতু ৱঃ পীতকৌশেযকান্তম্॥ **1** ॥

শঙ্খচক্রগদাপদ্মকুম্ভাদর্শাব্জপুস্তকম্।
বিভ্রতং মেঘচপলৱর্ণং লক্ষ্মীহরিং ভজে॥ **2** ॥

ৱিদ্যুৎপ্রভাশ্লিষ্টঘনোপমানৌ
শুদ্ধাশযে বিম্বিতসুপ্রকাশৌ।
চিত্তে চিদাভৌ কলযামি লক্ষ্মী -
নারাযণৌ সত্ত্বগুণপ্রধানৌ॥ **3** ॥

## স্তোত্রম্

লোকোদ্ভৱস্থে মলযেশ্ৱরাভ্যাং
শোকোরুদীনস্থিতিনাশকাভ্যাম্।
নিত্যং যুৱাভ্যাং নতিরস্তু লক্ষ্মী -
নারাযণাভ্যাং জগতঃ পিতৃভ্যাম্॥ **4** ॥

সম্পৎসুখানন্দৱিধাযকাভ্যাং
ভক্তাৱনানারতদীক্ষিতাভ্যাম্।

নিত্যং যুৱাভ্যাং নতিরস্তু লক্ষ্মী -
নারাযণাভ্যাং জগতঃ পিতৃভ্যাম্॥ **5** ॥

দৃষ্টেৱাপকারে গুরুতাং চ পঞ্চ -
ৱিংশাৱতারান্ সরসং দধদ্ভ্যাম্।
নিত্যং যুৱাভ্যাং নতিরস্তু লক্ষ্মী -
নারাযণাভ্যাং জগতঃ পিতৃভ্যাম্॥ **6** ॥

ক্ষীরাম্বুরাশ্যাদি ৱিরাটভৱাভ্যাং
নারং সদা পালযিতুং পরাভ্যাম্।
নিত্যং যুৱাভ্যাং নতিরস্তু লক্ষ্মী -
নারাযণাভ্যাং জগতঃ পিতৃভ্যাম্॥ **7** ॥

দারিদ্র্যদুঃখস্থিতিদারকাভ্যাম্
অদ্যৈৱ দূরীকৃতদুর্গতিভ্যাম্।
নিত্যং যুৱাভ্যাং নতিরস্তু লক্ষ্মী -
নারাযণাভ্যাং জগতঃ পিতৃভ্যাম্॥ **8** ॥

ভক্তৱ্রজাঘৌঘৱিদারকাভ্যাং
স্বীযাশযোদ্ধূতরজস্তমোভ্যাম্।
নিত্যং যুৱাভ্যাং নতিরস্তু লক্ষ্মী -
নারাযণাভ্যাং জগতঃ পিতৃভ্যাম্॥ **9** ॥

রক্তোৎপলাভাভৱপুর্ধরাভ্যাং
পদ্মারিশঙ্খাব্জগদাধরাভ্যাম্।
নিত্যং যুৱাভ্যাং নতিরস্তু লক্ষ্মী -
নারাযণাভ্যাং জগতঃ পিতৃভ্যাম্॥ **10** ॥

অঙ্ঘ্রিদ্বযাভ্যর্চককল্পকাভ্যাং
    মোক্ষপ্রদপ্রাক্তনদম্পতীভ্যাম্।
নিত্যং যুৱাভ্যাং নতিরস্তু লক্ষ্মী -
    নারাযণাভ্যাং জগতঃ পিতৃভ্যাম্॥ **11** ॥

ইদং তু যঃ পঠেৎ স্তোত্রং লক্ষ্মীনারাযণাষ্টকম্।
ঐহিকামুষ্মিকসুখং ভুক্ত্বা স লভতেঽমৃতম্॥ **12** ॥

॥ ইতি শ্রী লক্ষ্মীনারাযণাষ্টকং সমাপ্তম্ ॥